# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा – प्रथमपत्रिका

**दिनाङ्क:- ०२. ०२ .२०२०** **पूर्वाह्ण: १०.००त: १.०० पर्यन्तम्**

**समय:- होरात्रयम्** **अङ्का: - १००**

**सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयु:**

**1. अष्टानाम् एकवाक्येन उत्तरं लिखत ।** **8**

१. स्थाण्वीश्वरस्य राजा कः ?

२. दक्षिणाम्नाय श्रीशारदापीठं कुत्र विद्योतते ?

३. ' शिवलीलार्णव '-महाकाव्यस्य रचयिता कः ?

४. बिल्ववाटिकायां कः आसीत् ?

५. प्रतापशीलस्य सुतौ कौ ?

६. विचित्रवीर्यस्य कृते भीष्मेण काः आनीताः ?

७. लक्ष्मणसूरिः कस्मिन् वर्षे जन्म लेभे ?

८. काशीराजपुत्री कदा ननर्त ?

९. अविनीतसंपदः कथं भूताः ?

१०. राज्ञो रहस्य भेदनेन का परितुष्टा ?

**2. षण्णां वाक्यद्वयेन उत्तरं लिखत ।** **12**

१. लक्ष्मीः क्षीरसागरात् कानि विनोदचिह्नानि आनीतवती ?

२. सिद्धः भस्मना किं किं चकार ?

३. आचार्यस्य सिद्धलोकगमनानन्तरं तस्य त्रयः शिष्याः किमकुर्वन् ?

४. भीष्मपरशुरामयोः अन्तिमदिनयुद्धं कथम् अभवत् ?

५. कालिदासविरचिते खण्डकाव्ये के, महाकाव्ये के ?

६. गुरूपदेशः किं किं करोति ?

७. शापग्रस्ता उर्वशी यदा भूमिमाजगाम तदा पट्टमहिषी नाथं किं वदन्ती आसीत् ?

८. नायकेन वध्यशिलायां कथं भूतं सुखं प्राप्तम् ?

**3. त्रयाणां पञ्चषैः वाक्यैः संस्कृते उत्तरं लिखत।** **9**

१. नायकः वनं कथं वर्णयति ?

२. रामः लवं निरूप्य किं वदति ?

३. केन कारणेन उर्वशी शप्ता अभवत् ?

४. कथंभूतः रिपुः केन उन्मूलयितुं क्षमः ?

५. लक्ष्मीः कान् कान् परिहरति ?

**4. त्रयाणां ससन्दर्भं विवृणुत।** **9**

१. " न धिक्क्रियसे गुरुभिः "।

२. " मूढाः पापानि कुर्वते "।

३. " तरुशाखान्तनिघर्षजोऽनलः" ।

४. " रामेण किं दुष्करम् " ।

५. " प्रकृतिभ्यः नृपतिः पदे पदे "।

**5. एकस्य पद्यस्य सान्वयमर्थं लिखत।** **4**

१. करुणैकमयः कलानिधिः सुलभस्सुन्दरमूर्तिरुज्वलः।
अवलोकित एव देहिनाम् अहरद्वाङ्मनसे स तापसः॥

२. आर्तं कण्ठगतं प्राणं परित्यक्तं स्वबान्धवैः।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः॥

**6. श्लोकद्वयं पूरयत।** **6**

१. मातस्त्वत्पादपद्मं ------------ मह्यम्॥
२. सच्चित् रूपात्मनो ------------ मह्यम्॥
३. शिवमौपयिकं ----------- जिगीषवः॥

**7. एकस्य कवे: देश-काल-कृति-वैशिष्ट्य-विषये लिखत ।** **4**

१. भारविः २. लक्ष्मणसूरिः

**8. चतुर्णां रूपाणि परिचाययत ।** **4**

| | | |
|---|---|---|
| १. अभिभूय | २. शतक्रतुना | ३ आत्मानम् |
| ४. वर्त्म | ५. जज्ञे | ६. करवाम |

**9. चत्वारि पदानि संस्कृतवाक्येषु योजयत ।** **4**

| | | |
|---|---|---|
| १. पारङ्गतः | २. विराजन्ते | ३ आगः |
| ४. उपादेयाः | ५. मघवा | ६. जिह्वा |

**10. चतुर्णां पर्यायपदं लिखत ।** **4**

| | | |
|---|---|---|
| १. धीवरः | २. मृगलाञ्छनः | ३ रोधः |
| ४. द्विरदः | ५. रयः | ६. अभ्रम् |

**11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत।** **6**

| | | |
|---|---|---|
| १. मदोद्धतः | २. सुकरस्तरुवत् | ३. सिद्धादेशः |
| ४. समवृत्तिरुपैति | ५. परिगृह्णाणेति | ६. तयोर्निमित्तम् |

**12. चतुर्णाम् एकपदं लिखत ।** **4**

| | | |
|---|---|---|
| १. मुखे भवम् | २. क्षत्रियेषु अधमः | ३. प्रचेतसः पुत्रः |
| ४. विनयेन हीनः | ५. चौर्येण अवाप्तं धनम् | ६. कुटिलरहितयुद्धव्यापारः |

**13.चतुर्णां व्याकरणविशेषं लिखत ।** **8**

| | | |
|---|---|---|
| १. लोकमधितिष्ठति | २. वात्या | ३. कुप्यन्ति हितवादिने |
| ४. अवतिष्ठन्ते | ५. भवते रोचते | ६. आदायचरः |

**14.चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत।** **8**

१. अमर्षकलुषः २. अनर्हव्यवहारस्य ३. जपदामकरः

४. मृगीदृशाम् ५. ग्रामान्तरम् ६. यथामति

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत।** **6**

१. अचिन्तयत् २. लेभे ३. करोतु

४. गणयामास ५. याति ६. चुक्रोश

**16. चतुर्णां रिक्तस्थानानि पूरयत।** **4**

१. प्रभाकरपत्नी ------------------------ आसीत्।

२. "रत्नावली" नाटकं ----------- लिखितम्।

३. कमलजदयिताष्टकस्य कर्ता ------------------।

४. नागानन्दस्य नायकः ------------------------।

**५. मालतीमाधवस्य रचयिता ----------------।**

---

**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**प्रवेशपरीक्षा - द्वितीयपत्रिका**

**दिनाङ्कः - ०२. ०२.२०२०** **अपराह्णः १.३०तः ३.००पर्यन्तम्**

**समयः - सार्धैकहोरा** **अङ्काः ५०**

**सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः**

**1. विषयद्वयं सोदाहरणं विवृणुत ।** **10**

१. दशलकाराः तेषां विकरणप्रत्ययाः च

२. प्रयोगाः

३. प्रेरणार्थकक्रियापदानि

**2. विषयद्वयं विवृणुत ।** **8**

१. सन्नन्तधातुरूपाणि

२. रूपकालङ्कारः

३. रथोद्धता

**3. त्रयाणां सर्वाणि रूपाणि तत्तल्लकारे लिखत ।** **9**

| | | |
|---|---|---|
| १. यातु | २. सूते | ३. रोदिति |
| ४. अस्तु | ५. ब्रवीतु | ६. सुष्वाप |

**4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत।** **4**

| | | |
|---|---|---|
| १. गेयम् | २. स्मृतवान् | ३. पूजयितव्यः |
| ४. भवन् | ५. सेवमाना | ६. पोषकम् |

**5. द्वयो : प्रयोगं व्यत्यस्यत।** **3**

| | |
|---|---|
| **१. मया शय्यायां शय्यते ।** | **२. बालः फलानि खादति ।** |
| **३. मित्रेण मह्यं पुस्तकं दीयते ।** | **४. गोपालः पयः दोग्धि ।** |

6. **त्रयाणां विग्रहवाक्यं कृत्वा समासनाम लिखत ।** 6

१. पारे समुद्रम् २. निर्विघ्नम् ३. मातृसदृशः
४. घनश्यामः ५. पञ्चगवम् ६. अनश्वः

7. **मातृभाषया अनुवदत ।** 5

१. रामे वनं प्रस्थिते सति प्रतिगृहं प्रजाः विलेपुः ।
२. गेयं गीता नामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
३. भक्तैः भगवान् वरान् याच्यते ।
४. छात्राः! यूयं सदा परेषां हितमेव कुरुत ।
५. धर्मक्षेत्रे समवेताः युयुत्सवः पाण्डवाः कौरवाः किमकुर्वत ।

8. **संस्कृतभाषायाम् अनुवदत |** 5

1. I was here expecting you.
ನಾನು ನಿನ್ನನ್ನು ಇದಿರುನೋಡುತ್ತಾ ಇಲ್ಲಿ ಇದ್ದೆನು

2.The thief ran after stealing my money.
ನನ್ನ ಧನವನ್ನು ಕದ್ದ ಮೇಲೆ ಕಳ್ಳನು ಓಡಿಹೋದನು.

3.The milk is milked from the cows in the morning.
ಪ್ರಾತಃಕಾಲ ಹಸುಗಳಿಂದ ಹಾಲು ಕರೆಯಲ್ಪಡುತ್ತದೆ.

4. Saints by telling God's stories satisfy the people.
ಸಾಧುಗಳು ಭಗವಂತನ ಕಥೆಗಳನ್ನು ಹೇಳುತ್ತಾ ಜನರನ್ನು ಸಂತೋಷಪಡಿಸುತ್ತಾರೆ.

5. I sold my land but did not get extra money.
ನಾನು ನನ್ನ ಕ್ಷೇತ್ರವನ್ನು ಮಾರಿದೆ; ಆದರೆ ಹೆಚ್ಚು ಹಣಗಳಿಸಲಿಲ್ಲ.

--------------------